मजार्कांशविस्तृतिपिण्डाः "अष्टधा भक्तस्य क्षेत्रस्य यः स्यादष्टमांशो भागस्तादृशैः पञ्चभिर्भागैर्भुवं खनेत् उपरि त्रिभिस्तादृशैर्भागैस्तिस्रो मेखला रचयेत् कीदृशीः षड्द्वादशांशाः चतुस्त्रिद्व्यङ्गुलमितास्तैस्तुल्यविस्तारौच्चं यासान्ता इति व्याख्या। विश्वकर्म्मा "व्यासात्खातः करः प्रोक्तो निम्नन्निध्यङ्गुलेन तु। कण्ठात् परं मेखला तु उन्नता सा नवाङ्गुलैरिति"। क्रियासारे "प्रधानमेखलोत्सेधउक्तमत्र नवाङ्गुलम्। तद्बाह्यमेखलोत्सेधमङ्गुलद्वितयंक्रमात्। चतुस्त्रिद्व्यङ्गुलव्यासो मेखलात्रितयस्य तु" योगिनीहृदयेऽपि "मेखलाः शृणु मे देवि! हस्तादिषु विशेषतः। षड्भागार्कांशसूर्य्यभागैर्म्मिताः स्युर्गोपिताः शुभाः" इति। अथ प्रकारान्तरेण मेखलालक्षणं नाभिलक्षणं चाह "रसांशकादुन्नतविस्तृताश्च तिस्रोऽथवैका युगभागतुल्या। पञ्चाथवा षट्शरवेदरामद्व्यंशैस्ततः स्युर्नवभागपिण्डाः। आद्यापरास्तच्छरभागहीना जिनांशकण्ठाद्बहिरेव सर्व्वाः। कुण्डानुसारा अपि मेखलाः स्युरर्काङ्गभागौच्चत्रतिस्तु नाभिः। कुण्डाकारोनाभिरम्भोजसाम्योवाब्जेऽयं नेनांशहानिर्द्दलाग्रे। शेषक्षेत्रे वह्निवृत्तैः समेते स्युर्वै कर्ण्यः केशराः पत्रकाणि" अथवा क्षेत्रषडंशादुन्नताः षडंशेनैव विस्तृतास्तिस्रो मेखला भवन्ति अथैकमेखलापक्षमाह एकैवमेखला क्षेत्रचतुर्थांशोच्चा तत्तृतीयांशविस्तृता च स्यात्। पञ्चमेखलापक्षमाह। अथ पञ्च मेखलाः कार्य्याः षट्पञ्चचतुस्त्रिद्व्यङ्गुलैः पारिभाषिकैर्व्विस्तृताः। अथपञ्चमेखलानामुच्चता माह तत्रादिमा नवभागः पिण्डःऔच्चं यस्याः सा पारिभाषिकनवाङ्गुलोच्चा स्यात् अपरा मेखलास्तस्या आद्याया यः शरांशः पञ्चांशस्तेन हीना भवन्ति यथा एकहस्ते कुण्डे प्रथममेखला नवाङ्गुलोच्चा अस्याः पञ्चमांशः १।६।२।१।५ एष एकद्वित्रिचतुर्गुणः प्रथममेखलामाने न्यूनः कृतः सन् तदधःस्थानां मेखलानामौच्चं स्यात् यथेदं द्वितीयमेखलौच्चम् ७।१।४ ६।२ एवमपरासामपि द्रष्टव्यम्। ताः मेखलाः सर्व्वाः क्षेत्रचतुर्व्विंशतिभागमितात् कण्ठाद्बहिरेव भवन्ति कीदृश्यः कुण्डानुकाराः योन्यादिकुण्डेषु योन्याद्याकारा एव स्युः अपिरेवार्थे। अथ नाभिलक्षणमाह नाभिर्द्वादशांशेनोच्चः षडंशेन विस्तृतः कुण्डानुकारः यादृशस्तुरस्राद्याकारं कुण्डं तादृशो नाभिः। अथवा नाभिरम्भोजसमः कमलाकारः कार्य्यः अयं नाभिरब्जे पद्मकुण्डे सम्भवति तत्र नाभिरूपायाः कर्णिकायाः समन्तात्। अथ पद्माकारकरणं नाभेरुच्यते दलाग्रे दलाग्रनिमित्तं द्व्यङ्गुलोच्चे चतुरङ्गुलविस्तारायामे नाभौ इनांशहानिर्द्वादशांशत्यागः कार्य्यः शेषमवशिष्टं क्षेत्रं तस्मिन् वृत्तत्रयं समभागेन कार्य्यम्। तत्र मध्यचिह्नात् प्रथमं वृत्तं कर्णिका द्वितीयं वृत्तं केशरस्थानं तृतीयं पत्राणि तद्बहिरवशिष्टद्वादशांशेन दलाग्राणि रचयेदिति व्याख्या। वाशिष्ठ्याम् "प्रथमं मेखला तत्र द्वादशाङ्गुलविस्तृतिः। चतुर्भिरङ्गुलैस्तस्याश्चोन्नतिश्च समन्ततः। ततश्चोपरिवप्रः स्याच्चतुरङ्गुलमुन्नतः। अष्टाभिरङ्गुलैः सम्यग्विस्तीर्णश्चोन्नतस्तथा"। पिङ्गलामते "एका षडङ्गुलोत्सेधविस्तारा मेखला मतेति" लक्षणसंग्रहे तु विशेष उक्तः। "चतुरङ्गुलविस्तारोत्सेधा चैकैव मेखलेति" तन्त्रान्तरे "षष्ठांशेनाष्टमांशेन मेखलाद्वितयं विदुरिति" अयं पक्षोऽबहुसंमतत्वादुपेक्षित एव। सिद्धान्तशेखरे "षड्वाणाब्धिवह्निनेत्रमिताः स्युः पञ्च मेखलाः" इति लक्षणसंग्रहे "पञ्च वा मेखलाः कार्य्याः षट्पञ्चाब्धित्रिपक्षकैः। प्रथमा कुण्डसहितोत्तरोत्सेधनवाङ्गुलेति" पिङ्गलामते "खातादेकाङ्गुलन्त्यक्त्वा मेखलानां स्थितिर्भवेदिति" शारदायाम् "कुण्डानां यादृशं रूपं मेखलानाञ्च तादृशम्" इति तत्रैव "कुण्डानां कल्पयेन्नाभिमम्बुजसन्निभम्। तत्तत्कुण्डानुरूपं वा मानमस्य निगद्यते" षट्त्र्यरत्निरत्निहस्ता नाभेरुत्सेधता मता। नेत्रवेदाङ्गुलोपेतेति" पद्मे नाभिं विवर्जयेदिति प्रागेव लिखितम्। अम्बुजाकारकरणं तत्रैव "पद्मकुण्डे तु क्षेत्रस्य द्वादशांशं बहिः सुधीः। तन्मध्ये विभजेद् वृत्तैस्त्रिभिः समविभागतः। आद्यं स्यात् कर्णिकास्थानं केशराणां द्वितीयकम्। तृतीयन्तत्र पत्राणां सुद्धांशेन दलाग्रकमिति" अथ योनिलक्षणमाह "योनिर्व्यासार्द्धदीर्घा विततगुणलवादायताब्धिद्विभागातुङ्गतायत् समन्तात् परिधिरुपरिगस्तावदग्रेण रम्यम्। निम्नं कुण्डं विशन्ती वलयदलयुगेनान्विताधो विशाला, मूलात् सच्छिद्रनालान्तरवटरुचिराश्वत्थपत्राकृतिः स्यात्" योनिर्व्यासार्द्धेन दीर्घा विस्तारस्तृतीयांशेन विस्तीर्णा चतुर्व्विंशांशेनोच्चा चतुर्व्विंशांशेन परिधिर्मेखला यस्याः सा तावतैवाग्रेण चतुर्व्विंशांशेन निम्नं यथा तथा कुण्डं प्रति विशन्ती वलयदलयुगेन वृत्तार्द्धद्वयेन युता अधो विशाला अर्थादुपरिस्वल्पसंकोचनवतीमूलात्स्थलात्सकाशात् मध्ये सच्छिद्रं नालं